# प्रथमोऽध्यायः

## (संस्कृतवाङ्गमये  ज्यौतिषविमर्शः)

# प्रथमोऽध्यायः
## (संस्कृतवाङ्गमये ज्यौतिषविमर्शः)

1. वेदेषु ज्यौतिषशास्त्रविमर्शः।

2. ब्राह्मणारण्यकोपनिषत्सु ज्यौतिषशास्त्रविमर्शः।

3. संहितासूत्रग्रंथेषु ज्यौतिषशास्त्रविमर्शः।

4. पुराणसाहित्यस्य परिचयः तत्र ज्यौतिषशास्त्रविमर्शः।

# 1.वेदेषु ज्यौतिषशास्त्रविमर्शः

वेदः ज्ञानराशिः अस्ति। वेदेषु सर्वे विषयाः समाहिताः सन्ति। वेदानामध्ययनेन ज्ञायते यत् अत्र ज्ञानमीमांसा अस्ति पृथिव्याः गतिः द्वैविध्यां अस्ति। वेदे वर्णाश्रमधर्मविषयः अस्ति। वेदे विज्ञामपि अस्ति। एवं प्रकारेण प्रायेण जगतः सर्वे विषयाणां उल्लेखः वेदेषु प्राप्यते। अत्र तु चतुर्वेदेषु ज्यौतिषशास्त्रस्य के सन्दर्भः सन्ति इत्यस्य निरूपणमुपस्थाप्यते।

ज्योतिषशास्त्रे भागद्वयमस्ति। खगोलरूपेण संहितारूपेण च। अत्र प्रथमे हि वेदेषु ज्यौतिषशास्त्रविमर्शः इति आधारीकृत्यैव लिख्यते।

वेदे गणितशास्त्रम् व्योविज्ञानं, सूर्यादिनाम् मति निर्देशमपि द्रष्टुम् शक्यते। तद्यथा सूर्यग्रहः यदा आर्कषति तदा पृथिव्यादि लोकान् स्वकक्षायां भ्रमयति।

एताद्विज्ञानामधोऽकृता मन्त्रा अनुसन्धेयाः।  
यदा ते मारुतीर्विशस्तुभ्यमिनद नियेमिरे।  
अदित्ते विश्वां भुवनानि योमिरे।।[1]  
यदा सूर्यममुं द्विवि शुक्रंज्योतिस्धारयः।  
अदित्ते विश्वां भुवनानि योमिरे।।[2]

---

1. व. अ.-6, अ.1, व.6, म.4
2. ऋ.अ.-6, अ.1,। व.6/म.3

यदा ते हर्यता हरी वावृधाते दिवे-दिवे।

अदित्ते विश्वां भुवनानि योमिरे।।[1]

आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतंमर्त्यं च।

हिरण्येन सविता रथेना देवो याति भुवनानि पश्यन्।।[2]

**पृथिव्यादिभ्रमणविज्ञानम् :---**

सवितामन्त्रैः पृथिवी मरम्णादस्कम्भने सविता द्यामदृदृतं।

अश्वनिवाधुक्षाद् धुनिमन्तरिक्षमतूर्त्ते बद्धं सविता समुद्रम।।[3]

अत्र पृथिवीगुहस्व परिभ्रमणस्य वैदिकसिद्धान्तम् अत्र दृश्यते। शीतकाले उष्णकाले मार्गे गृहे च यदि कोऽपि जनः सूर्यस्य सेवनं करोति तेन आरागग्यरूपं प्रयच्छति यथा ---

शन्नो भवचभूषा अन्हाशं भानुना हिमांशं घृणेन।[4]

वेदे सूर्य भुवनानां कथं तत् तु इतयस्य विवेचनं उपलभ्यते। समस्त वाङ्मयः चत्वारो वेदस्य एव मूलः। एवं तस्य षडांगानि (पुराण, न्याय, मीमासां, धर्मशास्त्रादि) चतुर्दशधा विभक्तः। तेषां

-----------------

1. ऋ.अ.6/अ.1 व.6/मं.3
2. यजु. अ.33, मं.437
3. ऋक्. 10/149/1
4. ऋक्. म. 10/37/10

च शाखा, प्रशाखादयः सहस्त्रधा विभक्ताः सन्ति। चत्वारो वेदानां चत्वारो संहिताश्च वर्तन्ते। ऋग्संहिता, यजु:संहिता, सामसंहिता, अथर्वसंहिताश्च।

तत्रापि ऋचस्य एकविंशति शाखा, यजुर्वेदस्य द्वौ विभागौ तत्र शुक्लभागे पञ्चदश, कृष्णभागे तु षडशीति अत्र एकोत्तरशतं शाखां च। प्रत्येक शाखायां स्व-स्व ब्राह्मण ग्रन्था:, आरण्यकानि, उपनिषदाश्च वर्तन्ते। मूलसंहितानां प्रत्येकानां उपवेदाः क्रमेण आयुर्वेद, धनुर्वेदः, गान्धर्वादि च प्राप्यन्ते। पुनः सर्वेषां प्रत्येकं शिक्षा- कल्प - व्याकरण - निरुक्त - छन्द -ज्योतिषम् च षडांगानि सन्ति।

तत्रापि असंख्य संख्यकानि उपङ्गानि। प्रत्येक शास्त्राणि केषांचित शाखादि विभागेषु च विभक्तानि इत्थं प्रकारेणैव च ज्यौतिषमपि त्रिषु विभागेषु प्राप्यते।

ज्योतिषं हि वेदस्य चक्षुरूपेण कथ्यते। यथा मुखं-व्याकरणं, शिक्षा - घ्राणं, छन्द-पादौ, इत्यादिकं वेदरूपी पुरुषस्य भवन्ति।

''वेदचक्षुः किलेदं स्मृतं ज्योतिषंमुख्यताचाङ्गमध्येऽस्य तेनोच्यते।

संयुक्तोऽपितरैः कर्णनासादिभि:चक्षुषाङ्गेन हीनो न किंञ्चित्करः।।[1]

ज्योतिषं शास्त्रास्येतिहासः स्वरूपं वा ब्रह्माण्डोपत्यात् एव दृश्यते। एवं असिमन ब्रह्माण्डस्य यावत गतिः तावत तस्य स्थितिश्च।

---

**1.**सि.शि.1/11

अस्मिन्शास्त्रे अन्तरिक्षे विद्यमान नानाविधविद्यमान ज्योतिषपिण्डानां ज्ञानमध्ययनं वा भवति। अत: आकाशे दृष्ट: चन्द्र: नक्षत्रादीनां च ग्रहाणां च मूलोत्पत्ति: सूर्यात् एव मन्यते।

एवं आकाश मण्डले च सूर्यस्य ज्योति: दृश्यते। अतएव संभवत: अस्य शास्त्रस्य नामकरणं ज्योति: सम्बन्धित विषयाणां समावेश कारणेन ज्यौतिषशास्त्रमित्युच्चे। वयं वक्तुं शक्नुवन्त: यत् सूर्यादिग्रहाणां ज्ञानं कालगणनात्यादीनाम् बोध: यस्मिन्शास्त्रे च भवति। अत्र प्राधान्येन ग्रहा: नक्षत्राणि, धूमकेतु आदि ज्योति: पदार्थानां स्वरूपाणि इत्यादि परिभ्रमणकालादि ग्रहण स्थिति इत्यादि प्रभृतिकालदारभ्य समस्त निरूपणं एवं ग्रहाणां नक्षत्रादीनां स्थिति: वा गोचरे भ्रमणादि प्रभावात् शुभाशुभ फलादेश: च क्रियते।

केषांचित मुनीनां च मतेन आकाशमण्डले स्थित समस्त ज्योति: सम्बधित विविध विषयाणां समावेश: कारणेन शास्त्र इयमेव ज्योतिर्विद्या नामकरणं च कृतम्।

यस्मिन् शास्त्रे च पूर्वोक्त विषयाणां विस्तृतं वर्णनं दरीदृश्यते तत् एव ज्यौतिषशास्त्रम्।

पाणिनिमतानुसारं द्युतिधातो: ''द्युतेरिसिन्नादेश्च ज'' इति जकार भूत्वा ''ज्योति:'' शब्दनिष्पन्नो भवति। तदुपरान्तम् अधिकृत्य कृतेग्रन्थे इत्यनेन सूत्रेण अण् प्रत्यय भूत्वा ज्योतिष शब्द: निष्पन्नो भवति। ज्योतिष शब्दस्य विविधार्था: भवन्ति। यथा- ज्योति:, प्रकाश:, तेज:, दीप्ति:, प्रभासनमादि। गगनमण्डले दृष्यमानानि यानि हि तेजोमयानि

विविधानि बिम्बानि दृष्यन्ते। तानि सर्वाण्येव जेतिः पदेन ज्ञायते। खगोले दृश्यमानानि यानि हि यदैकरूगतीनि तानि नक्षत्र शब्देनाभिः-धीयते। प्रतिदिनं भिन्नं-भिन्नं गत्या तु ग्रहशब्देन ज्ञायन्ते। ज्योतिसम्बन्धिः विविधविषयोपरि तेषां गतिप्रभावादिवर्णनपरकं जातकपारिजातः, वृहत्संहिता, मुहूर्तचिन्तमण्यादिग्रन्थाः ज्योतिषग्रन्थरूोण ज्ञायन्ते।

अस्माकं भारतीयसंस्कृतेः आधारभूते वेदेष्वपि ज्योतिषस्य वर्णनं प्राप्तं भवति। कारणं च वेदप्रतिपाद्यानां यज्ञमायोजनं कालसापेक्षं भवति। केचन याः संवत्सरः सम्पाद्याः भवन्ति, केचन मासः सम्पाद्याः भवन्ति, केचन पक्ष सम्पाद्याः भवन्ति। यज्ञकालमधिकृत्य तैत्तिरीय ब्राह्मणे कथितोऽस्ति। तद्यथा --

प्रातर्जुहोति, सायं जुहोति, इति।[1]

यज्ञानुष्ठाने येन प्रकारेण विधानस्य शुद्धिरावश्यकी भवति, तेनैव प्रकारेणकालस्यापि शुद्धिरावश्यकी भवति।

उक्तं च श्रुतिः --

ते असुरा अयज्ञा अदक्षिणा अनक्षत्राः।
यच्च किञ्चाकुर्वत तां कृत्यामेवाकुर्वतः।।

अनेन कारणेन यज्ञानुष्ठानाय कालस्य शुद्धिः आवश्यकी।

उक्तं च आष ज्योतिषे। तद्यथा ---

---

1. तैतिरीय ब्राह्मण - 2/1/2

अनेन कारणेन यज्ञानुष्ठानाय कालस्य शुद्धिः आवश्यकी। उक्तं च आष ज्योतिषे। तद्यथा ---

वेदाहि यज्ञार्थमभिप्रवृताः कालनुपूर्वो विहितश्च यज्ञाः।
तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद सवेद यज्ञान्।।[1]

चतुर्णामपि वेदानां ज्यौतिषशास्त्रमपि पृथकमस्ति। तद्यथा --

ऋग्वेदस्य ज्योतिष- षट्शतपद्यात्मकं आर्षज्योतिषम्।

यजुर्वेदस्यज्योतिष एकोनचत्वारिंशतपद्यात्मकमायुषज्योतिषम्।

अथर्ववेदस्यज्योतिष- द्विषष्टियुतरशतपद्यात्मकर्थ्वणज्योतिषम्।

सामवेदस्यज्योतिष अधुना नोपलभ्यते। पूर्वोक्ततत्रयाणां ज्यौतिषशास्त्रस्य प्रणेता लग्धः नाम्ना आचार्यः वर्तते। आयुष्ज्योतिषस्य प्रामाणिकं भाष्यमपि समुपलभ्यते। तद्यथा --सोमकरविरचितम् भाष्यम् तथा सुधाकरद्विवेदिकृतम् भाष्यम् च इति।

वेदाङ्गज्योतिषग्रन्थस्य प्रणेता आचार्य लग्धः एवासीत इत्यत्र नास्ति मतभेदः। वेदाङ्गज्योतिषग्रन्थस्यावतारकालः 3400 वत्सरेभ्योऽपि पूर्ववर्ती वर्तते। तथैव ज्योतिषस्य वेदमूलकत्वं स्वयं सिद्धयति।

---

**1.**आ. ज्योतिष 63

## 2.ब्राह्मणारण्यकोपनिषत्सु ज्योतिषशास्त्रविमर्शः

वैदिक साहित्ये ब्राह्मणग्रन्थानां अतीव महत्त्वं वर्तते। सामान्येन ब्राह्मणेन प्रोक्तं तद् ब्राह्मणम् इति। न च ब्रह्मन् शब्दार्थ अपि कथनं न निष्पद्यते। ग्रन्थापरो ब्राह्मणशब्दः इति वाच्यम्। नंपुसकत्वात् ब्राह्मण ग्रंथ परम्वाच्य। तथैव आरण्यकम् शब्दः इति आरण्ये एव पाठ्यत्वात् आरण्यकं इति कथ्यते। आरण्यकं ब्राह्मणानां परिशिष्ट भागः इति कथ्यते। तथैव उपनिषदः अपि चतुवर्गगस्तु वेदात् धर्मार्थकाममोक्ष प्राप्त्यर्थम् एततच्छात्रम् अधिगतम्।

प्रतिवेदस्य ब्राह्मणानि भवन्ति प्रतिवेदस्यारण्यकानि अपि पृथक-पृथक रूपेण भवन्ति तथैव प्रतिवेदस्योपनिषदः अपि एतेषां ग्रन्थानां वर्णविषयाः विविधाः सन्ति, किन्तु अत्र ज्योतिषशास्त्र विषये अध्ययनं अन्वेषणमचावश्यकं इति। तेन कारणेन अत्र ब्राह्मण ग्रंथेषु ज्योतिषशास्त्र विमर्श तथा आरण्यकग्रन्थे तदुपरान्ते उपनिषत्सु ज्योतिषशास्त्र विमर्शः लिख्यते।

**ब्राह्मणग्रन्थेषु ज्योतिषम् :---**

ब्राह्मणमग्रन्थानाम् प्रतिपाद्यो विषयाः "यज्ञ-यागादिरेव। अत्र व्याख्यासामः इति"[1] अत्र देवतानां उद्देश्य पुरोणेषु चारु सानैय सोमादि प्रथमस्य यः त्यागः अर्थात् द्रव्य प्रक्षेपः स यज्ञः इति भावः। ते यागाः

त्रिविधाः भवन्ति। --

---

1. श्रौतसूत्र - 1/2, 1/2

1. दशपौर्णमासादय:

2. अग्नयाधेयाग्नि होत्राादय:।

3. अग्निष्ठहोमादया: च।

एतेषां यज्ञानां सम्पन्नाय मुर्हूतादिनां आवश्यकं भवति। तत्रैव ज्योतिषस्य विषय: आगच्छति। ज्योतिषशस्याधारेण अमुकयज्ञ: निश्चितरूपेण मुहूर्ते कर्तव्य:। अमुकनक्षत्रस्य प्रयोग: निश्चित नक्षत्रे कर्तव्य। अग्निमन्त्रस्य प्रयोग: निश्चितेषु मुर्हूतेषु भवति एवमेव प्रकारेण प्रतिवेदस्य यज्ञादीनां विधि: वर्तते। तत्रैव ब्राह्मणग्रंथानां ज्योतिषस्याधारीकृत्यैव कार्यम् भवति। अत्र विविध ब्राह्मण ग्रंथानां ज्योतिषदृष्ट्या मंत्राणां प्रयोग: क्रियते तस्योदहरणानि अत्र प्रस्तूयन्ते।

यथा --

प्राणो वा अथर्वा।[1]

अयं वै पूषा योऽयं वाता पवेत्।[2]

ऋचसंधिषु वै व्यार्धि जायते।[3]

शतायु वै: पुरुष:।[4]

---

1.शत. -6/4/2/1

2.शत. 6/2/1-19

3.गोप. 1/11

4.कौषी. 11.7

अग्नेवैऽधूमो जायते, धूमादभ्रमादवृष्टि:।[1]

सूर्या हि रक्ष सामपहन्ता।[2]

श्रिया वा एतद्रूपं यत्पत्न्या:।[3]

यद्यपि अग्नि:वायु: सविता त्वष्टा, ॠषभ:, अश्विनौ पर्जन्य:। उषा, विष्णु:, रुद्र:, इन्द्र, पूषा, वरुण:, आदित्य:, वृहस्पति:, सोम:, आप: इत्यादि देवा: ज्योतिषदृष्ट्या तेषां स्वरूपं अपि च भगवत: परमेश्वरस्य शक्तिरूपा कथिता:।

ज्योतिषशास्त्रे यद् खगोल विद्याया: वर्णनं प्राप्यते तत् तु ब्राह्मणग्रंथेषु वर्णनं उपलभ्यते। ब्राह्मणग्रंथेषु वेदमन्त्राणां विवरणं कार्यम् च उपलभ्यते। ज्योतिषर्विज्ञानस्य खगोलस्यचर्चाऽपि हृदयावर्जिका सूर्यस्य रथ: 50159 योजनं प्रचलति, यातिमानं प्रतिदण्डम् तस्य 79 योजनंमिति उषाश्च सूर्योदयात् अर्धदण्ड पूर्वम् उपयति इति।

द्वादशराशीनां पञ्चतत्वादिनां उल्लेख:ऽपिवेदेषु ब्राह्मण ग्रंथेषु च उपलभ्यते। हेमन्तशिशिर स्वीकृत्य ॠतव: पञ्च एव अभिमता: इति एवं प्रकारेण ब्राह्मण ग्रंथेषु अनेकेषु स्थलेषु ज्योतिषस्य वर्णनम् उपलभ्यते।

---

1.शात. 3/3/5/17

2.शात्. 1/3/1/4

3.तैत्तरीय. 29/4/7

## आरण्यकग्रन्थेषु ज्योतिषवर्णनम् :---

आरण्यक ग्रन्था: ब्राह्मणग्रन्थानां परिशिष्टरूपा: भवन्ति। आरण्यकानि हि गद्यपद्य मयानि संति। वानप्रस्थाश्रमस्य अध्ययन–अध्यापन स्वाध्याय परकाणि सन्ति। अत्र याज्ञिक रहस्यानां च संदर्भ: सन्ति। एतेषु ग्रंथेषु यज्ञादि कर्मकाण्डोपनयन ब्राह्मणग्रन्था: भवन्ति तथैव प्रतिवेदस्य आरण्यक ग्रन्थाऽपि जायन्ते। किन्तु ब्राह्मणग्रंथवत् अत्र ज्योतिषस्य अधिका: सन्दर्भा: नैव प्राप्यन्ते। निदर्शनमात्रं अत्र दीयते। ग्रन्थाश्रमाणां यज्ञादिविवरणं ब्राह्मणग्रंथेषु यथावर्णनम् प्राप्यते तथा वानप्रस्थाश्रमिणां यज्ञादि महाव्रतानां होत्रानां च निदर्शनम् आरण्यकग्रन्थेषु उपलभ्यते।

तैत्तरीयारण्यके पञ्चमहाभूतानां वर्णनं प्राप्यते तत्र पच्चमे यज्ञविधि: तत्रैव च यज्ञादिनाम् मुर्हूतविषये चर्चा उपलभ्यते।

ऐत्तरेयारण्यके महाव्रतानां वर्णनं नक्षत्रराश्यादीनां अनुस्वरेण उपलभ्यन्ते।

कौषितिकी उपनिषदे एव सांख्यानारण्यकरूपेण स्वीक्रियते तत्र यज्ञादीनां विवेचनं दृश्यते।

वृहदारण्यके यज्ञादीनाम् निरूपणं एकत्रिंशतऽध्याये उपलभ्यते। एवं प्रकारेण आरण्यकग्रन्थानाम् ज्योतिषदृष्ट्या विशिष्टवर्णनम् नैव कर्तुम् शक्यते।

**उपनिषदसाहित्ये ज्योतिषम् :----**

उपनिषदोहि वेदानां शीर्षाणि उच्यन्ते। विशेषरूपेण उपनिषद: मोक्षसाधका: सन्ति। उपनिषद: अपि प्रतिवेदस्य पृथक-पृथक रूपेण सन्ति। ता: कतिचन् गद्यात्मिका:, कतिचन पद्यात्मिका: कतिचन उभयात्मिकाश्च सन्ति। अत्र उपनिषत्सु ज्योतिषदृष्ट्या उपलभ्यते तदत्र उपस्थाप्यते।

उपनिषदां मुख्यत्वेन प्रतिपाद्यो: विषय: मोक्ष: एव किन्तु मोक्षप्राप्तयर्थम् कानि-कानि साधनानि कथं अधिगन्तव्यानि भवितुमर्हन्ति तद् विषये ज्योतिषस्य सांकेतिकरूपेण विषय: प्राप्तुमशक्नोति। कर्ममार्गम् प्रतिपन्थिनां कृते तत्वज्ञानाय कथं कर्म कर्तव्यं इति विषये किञ्चित वक्ति यथा -वृहदारण्यकोपनिषदि याज्ञवल्क्यन्गार्गी इत्यनयो प्रश्नोत्तराणां सन्ति तत्र खगोलशास्त्रस्य दृष्ट्य वर्णनं प्राप्यते। तद्यथा -----

कस्मिन्नु खलु वायुरोतश्च प्रतिश्चेति।

अन्तरिक्षलोके गार्गीति।।

कस्मिन्नु खलु आदित्यलोका ओताश्च प्रोताश्चेति।

कस्मिन्नु खलु आदित्यलोका ओताश्च आदित्यलोके।

कस्मिन्नु खलु चन्द्रलोका ओताश्च चन्द्रलोके।

कस्मिन्नुखलु नक्षत्रलोका ओताश्च चन्द्रलोके।

कस्मिन्नुखलु देवलोका ओताश्च देवलोके

कस्मिन्नुखलु इन्द्रलोका ओताश्च देवलोके।

कस्मिन्नुखलु ओताश्चेति। प्रजायतिलोके।।[1]

उपनिषत्सु आख्यानरूपेण ब्रह्मवा दिव्याः उपदेशाः प्राप्यन्ते। यथा -- कठोपनिषदि प्रत्यभावविषयिकी तत्वम् आख्यानरूपेण दृश्यते। एवं प्रकारेण अनेकानि उदाहरणानि उपनिषत्सु दृश्यन्ते। यथा छान्दोग्यापनिषदि अनेकविधाः विधानानाम् जन्मजीवनं निधनावस्थायां च निदर्शनम् प्राप्यते। श्वेताश्वत्तरोपनिषदि ज्योतिषस्य विषयाः दृश्यन्ते। केनोपनिषदि प्रश्नरूपेण जन्मनः संवादरूपेण विवरणं प्राप्यते।

एवं प्रकारेण उपनिषद् साहित्ये ज्योतिषशास्त्रस्य पौरोहित्यस्य च संबंद्धविषयाः सांकेतिकरूपेण उपलभ्यन्ते इति।

---

1.वृहदा. 3/6

# 3.संहितासूत्रग्रंथेषु ज्यौतिषशास्त्रविमर्शः

वेदानां विभाजनं संहितारूपेण जातं यथा - ऋग्वेदसंहिता, यजुर्वेदसंहिता, सामवेदसंहिता तथा अथर्ववेदसंहिता भेदेन।

संहिता पाठ रक्षणाय महर्षिभिः पाठपद्धतिमनुरुध्य निर्बुजसंहिता पित्रृणसंहिता इति द्विधा पाठेन विभज्यते। तत्र मूलस्य विकल पाठः निर्भुजं पाठ उच्यते।

मूलस्यविकृतरूपेण पाठपितृणि पाठः उच्यते। स च अष्टविधा भवति। अत्र संहितासूत्रग्रंथेषु ज्योतिषशास्त्रविमर्शः विविच्यते। तर्हि के सूत्रग्रन्थाः इति कथ्यते। सूत्रं नाम कल्पसूत्रं इति। कल्प्यते समर्थ्यते यज्ञयागादि प्रयोगाः यत्र इति कल्पसूत्रं अथवा कर्मकाण्डविधिः प्रतिपादकाः ग्रन्थाः कल्पसूत्र इति पदेन ज्ञायते। सूत्रग्रन्थाःऽपि कल्पसूत्र इति पदेन ज्ञायन्ते। सूत्रग्रन्थाः अपि द्विधा विभज्यते। --

1.श्रौतसूत्राणि। 2.गृह्यसूत्राणि

**श्रौतसूत्राणिः ---**

श्रुतिमूलकलतत्वानि सनित। अत्र श्रौतसूत्र ग्रन्थेषु संख्यायन श्रौतसूत्रम् आश्वालायन श्रौतश्रूत्रम् च प्रसिद्धं वर्तते। तथैव गृह्यूसत्रम् अपि प्रतिवेदस्य प्रसिद्धं इति। एताभ्यां सः धर्मसूत्रं अपि भवति। धर्मसूत्रेषु लौकिक-आचार-व्यवहार-धर्म प्रतिपादकः विषयकं वर्णनं कीदृशं अस्ति इति कथ्यते। तत्र ज्योतिषशास्त्र विषयकानि अनेकानि सूक्तानि सन्ति। यथा-- विवाहविषये

ग्रहस्थाश्रमोपदेशः अत्र प्राप्यते। तथैव पृथिव्यादि गति विषये अपि उपलभ्यते अन्तरिक्षे कथं व्योमविज्ञानं जायते इत्यस्य विवेचनं ऋक्संहितायां अस्ति। यथा ---

तुग्रोहभुज्युमश्विनोमेघे रयिं न कश्चिन्ममृवाँ अवाहाः।

तमूहभुनौ भिरात्मन्वतीभिरन्तरिक्षप्रदुभिपोदकाभिः।।[1]

यजुर्वेदसंहितायां जयोतिषविषयकाः मन्त्राः अनेकाः सन्ति। विशेषरूपेण यजुर्वेदस्य मन्त्राः यज्ञ-यागादि क्रियापरकाः सन्ति। सूर्यविषये कथयति ---

वृत्तेदृ ँ्ह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षाक्षन्ताम् मित्रस्याहं चक्षुषा सर्वाणिभूतानि समीक्षे।

मित्रस्य चक्षुषा समीक्षामा।।[2]

एवं प्रकारेण सामवेदेऽपि अनेके मन्त्राः खगोलशास्त्रविषयकाः प्राप्यन्ते यतोहि सामवेदस्य ये मन्त्राः सन्ति ते ऋग्वैदस्यैव भूतत्वात् न ते पृथगालोचनीयाः।

यजुवेर्दस्य मुख्योः विषयाः अन्यवेदवदेव तथापि ज्योतिषदृष्ट्या यद् वर्णनं उपलभ्यते तदत्र उदाहरणरूपेण लिख्यते अथर्ववेदे प्रायेण शासनसंचालनाय सभासमितिः च संचालनाय राज्यसिद्धान्तस्य वर्णनं प्रायेण दृश्यते। स्थायि खगोलशास्त्रस्य मनुष्यस्य च जीवननिर्वहणाय वर्णनं अपि दृश्यते। संहिता ग्रंथेषु कस्यापि --

---------------------------------------------

1.ऋक्. - 1/116/3

2.यजु. - 36/1800

विषयस्य स्वातन्त्र्येण समग्रं वर्णनं नैवोपलभ्यते, किन्तु यत्र-तत्र सर्वेषां विषयाणां वर्णनं दृश्यते तेन कारणेन विषदवर्णनं नैव कर्तुम् शक्यते। सूर्यविषयस्य मनुविषयस्य च इमा एते मन्त्राः उपलभ्यन्ते। --

अनुसूर्यमुदयता हृदद्योतो

हरिमा च ते।

गो रोहित्यस्य वर्णेन

तेन त्वा परिदध्मसि।।[1]

एवं प्रकारेण संहिताग्रंथेषु वर्णनम् उपलभ्यते।

**सूत्रग्रन्थेषु ज्यौतिषम् :---**

प्रतिवेदनस्य सूत्रग्रन्थोऽपि भवन्ति। वेदोक्तकर्मणां आनुपूर्वेण कल्पनया कल्पसाहित्यस्य कल्पत्वम्। पूर्वम् हि लिखितं यत् कल्पसाहित्यम्- श्रौतसूत्र - गृह्यसूत्र- धर्मसूत्र- शुल्बसूत्र भेदात् चर्तुधा विभक्तम्।

1. श्रौतसूत्रम्।
2. गृह्यसूत्रम्।
3. धर्मसूत्रम्।
4. शुल्बसूत्रम्।

---

1. अथर्व. -1/22/1

**श्रौतसूत्रम् :---**

अत्र वेदोक्त यागादिनाम क्रमबद्ध अध्ययनं भवति। प्रतिसंहिता पृथक श्रौतसूत्रं वर्तते।

**गृह्सूत्रम् :--**

अस्मिन् ग्रन्थे यज्ञविषयकं वार्षिककृत्यं, श्राद्धकर्म कथं, कदा च कर्तव्यं एतस्मन्नेव विषये ज्योतिषस्यावाश्यकता प्रतीयते तर्हि यजुर्वेदस्य गृह्यसूत्रं पारास्करगृह्यसूत्ररूपेण स्वीक्रियते। अत्र त्रीणि काण्डानि सन्ति यथा-गर्भाधानात् आरभ्य अन्त्येष्टिकर्म पर्यन्तम् तत्र मुर्हूतादिनाम विचारः अपि उपलभ्यते।

**धर्मसूत्रम् :---**

धर्मसूत्रेषु तात्कालिक जीवनस्य निदर्शनं अस्ति। प्रायश्चित्तादि नाम् व्रतानां नियमानां इत्यादि विषयेषु ज्योतिषस्योपयोगिता तत्र दर्शयति।

**शुल्बसूत्रम् :----**

शुल्बसूत्रेषु यज्ञसंबंधीनि उदाहरणानि संति। तत्र वेदनिर्माणं कदा कर्तव्यं, दिशादिज्ञानस्य, ज्योतिषस्य आधारः तत्र स्वीक्रियते। एवं प्रकारेण सूत्रग्रंथेषु ज्योतिषस्य विषयः न साक्षात्रूपेण अपितु गर्भित विषयरूपेण स्वीकर्तुम् शक्यते। यथा पारास्करगृह्यसूत्रे, आश्वालायन गृह्यसूत्रे, वैश्वालायन् सूत्रे च गृहकर्माणि निर्दिष्टानि अपि नक्षत्राधारी कृत्यैव वर्णितानि संति। देवयज्ञेषु ब्रह्मयज्ञेषु पितृयज्ञ, भूतयज्ञेषु च कदा विधिः करणीयः वेदाध्ययनं कदा प्रारम्भकरणीयः इत्यादि अनुष्ठानेषु ज्योतिषस्यावश्यकता तत्र स्वीक्रियते इति।

## 4.पुराणसाहित्यस्य परिचयः तत्र ज्यौतिषशास्त्रविमर्शः

**पुराण विवेचनम् :----**

पुराणं नाम किम्?

इत्यत्रं पुरातनमपि नवमिति पुराणम्।

पुराणानां धार्मिकदृष्ट्यामहत्वमधिकम्। वेदविहितानां धर्माणां सरल सुबोधभाषायां वर्णनापव पुराणानि विरचितानि ---

इतिहास पुराणाभ्यां वेदं समुपबृहंयेत्।
विभेत्यल्पश्रुताद्वदो मामयं पहरिष्यति।।

यदा वेदोक्तार्थाः लोकानां बुद्धौ नारोढुं प्रवृत्तास्तदा वेदोक्तार्थस्य ज्ञानं सुलभं कर्तु पुराणानि विरच्यन्ते।

समाजस्य तात्कालिकं स्वरूपबोधनायपि पुराणानामहानुपयोगः पुराणेषु प्राचीनभारतस्योतिहासो निहितः। पुराणौक्तानामितिचृत्तानां प्रमाणिकत्वं शिलालेखादिभिरपि कर्तुमारब्धम् अतो विदेशीया अपि विद्वांसः पुराणे धृतादराः प्रतिभान्ति।

इतिहासा यदि राज्ञां वृत्तं प्राधान्येन बोधयन्ति तदा पुराणानि राज्ञां वृत्तैः सह ऋषीणामपि वृत्तं बोधयन्ति परमोपयोगित्वं पुराणानाम्।

पुराणानि भौगोलिकसामगीमपि प्रस्तुवन्ति। काशीखण्डे काशीपुर्यास्तादृशं विस्तृतं वर्णनं विद्यते येन तस्या मानचित्रमिव पुरतः उपतिष्ठते। अन्येपि पुराणेषु तेषां–तेषां तीर्थानां तादृशं स्पष्टं वर्णनमुपलभ्यते येन तत्परिचये सौकर्यमयते।

पुराणेषु अतिशयोक्ति पूर्णा शैली समादृता येन लोकास्तानि अविश्वशनीय काल्पनिकानि च प्रमियन्ति स्म। तत्र बोद्धमिदं यत् त्रिधा वर्णनं क्रियते–वस्तुतत्वकथा रूपेण रूपकद्वारा अतिशयोक्ति द्वारा च। वस्तु तत्व कथा वैज्ञानिकानाम् ते हि वस्तु यथारूपेण वर्णरून्ति, न किमपि रज्जनं तत्रत्रचरन्ति। रूपकद्वारा वस्तुकथन प्रणाली वेदेषु व्यवहियन्ति तत्र हि उषः सुन्दरी कृता वृत्तश्च राजाकृतः। प्रणाल्यां वर्णिता अर्था यथामिति विविच्य ग्रहीतव्या भवन्ति। पुराणानां तुलनात्मकध्ययन तदन्तस्थले प्रवेशनं च यदि क्रियते तदा तत्र इतिहास भागः सामाजिकवर्णानां रहस्यं च स्पष्टमिव भासते इति विदुषां विचारः।

**पुराण लक्षणम् :----**

पुराणं पुरातन भाख्यानमुच्यते। संस्कृते पुराणशब्दश्चिन्रन्तन पर्यायः। पुराणेषु भूत–वर्तमान–भविष्यावार्थो वर्ण्यन्ते। इतिहासे तु प्राचीनास्तु पुराणमपितिहासशब्देनाभिद्यते।

पुराणेषु पुराण लक्षणमित्थुमुक्तम् ---

सर्गश्च प्रतिसर्गश्च वंशो मन्त्वराणि च।
वंशानुचरितं चैव पुराणं पच्चलक्षणम्।।

सर्गः सृष्टिः प्रतिसर्गः, सृष्टेर्लयः पुनश्च सृष्टिः वंशः सृष्ट्यादौ वंशवली मन्वन्तराणि के-के मानवः कदा-कदा अजायन्तेति वर्णनानि वंशानुचरितं सूर्यचन्द्रवंशयो विशिष्य वर्णनम् इदं वस्तु पच्चकं पुराणेष्वपक्ष्यते।

वस्तुस्तु नैतान्येन वस्तूनि पुराणेषु वर्णयन्ते इदं तु न्यूनतमं वर्णनीयम्। पुराणेष्वितोऽधिकान्यपि तानि-तानि वस्तूनि वर्णयन्ते। उदाहरणार्थमग्निपुराणमेव गृह्यताम्। तत्र हि सर्वाण्यपि ज्ञातव्यवस्तूनि वर्णितानि, येन तत् भारतीयज्ञान कोषः इत्यभिधीयते।

कस्यापि मानव समाजस्य इतिहासस्तावन्न पूर्णो मन्यन्ते, यावतस्य सृष्टेः प्रारम्भकालतः इतिहासो न प्रस्तूयते। पाश्चात्यशिक्षा प्रभाविता विद्वांसो नैतदनुमादयन्ति स्म, अतः ते पुराणानि सत्यानि न स्वीकुर्वन्ति स्म। परं सम्प्रति दृष्टिकोण परिवर्तनं जातम्।

एम.जी.वेल्स महोदयः ‘‘Outline of the History” नामके पुस्तके स्वग्रन्थे पौराणिकी प्रणालीमनुसृत्यवान्। अनया सुसंस्कृतया दृष्टया भारतीय मितिहास जिज्ञासामानानां कृते पुराणानि निधि इव।

**पुराणानां रचनाकालः ----**

पुराणानां रचना कदा जातेति प्रश्ने निर्मलिख्ति विषयाः पूर्व ध्यातव्याः -

**अथर्ववेदे** पुराणस्य उल्लेखो दृश्यते --

ऋचः सामान्दिन्दांसि पुराणं यजुषां सह।

उच्छिष्टाज्जरङ्गिरं सर्वे दिवि दवा दिवि श्रितः।[1]

**गोपथब्रह्मणे पुराणानि स्मर्यन्ते --**

एवमिमे सर्वे वेदाः निर्मिताः संकल्पाः सरहस्याः स ब्राह्मणाः सोपनिषत्सुसतिहासाः सान्वयख्याताः सपुराणाः सस्वरः।[2]

**शतपथे** --

सोऽयमिति किच्चित पुराणमाचक्षीता।[3]

**बृहदारण्यके** --

इतिहासः पुराणं विद्या उपनिषदः।[4]

**छन्दोग्योपनिषदे** --

ऋग्वेदं भगवतोऽध्येमिः-इतिहास पुराणं पच्चमं वेदानां वेदम् ।

1.आपस्म्बधर्मसूत्रे पुराणस्योल्लेख एव न केवलोऽपि तु श्लोक संख्यायुक्ता।[5]

---------------------------------------------

1. अथर्व. - 11/7/24

2. गोपथ ब्राह्मण-2

3. शतपथ.- 13/4/3/13

4. बृहदा. - 2/4/11

5. छान्दोग्य

1. अथ पुराणे श्लोकानु दाहरन्ति अष्टाशीति सहस्राणीति।[1]
2. शंकरचार्यः कुमारिभट्टश्च पुराणान्यद्धृतवन्तौ। बाणभट्टः हर्षचरिते पुराणेषु वायु प्रलपितम् इत्याह।
3. पुराणेषु कलियुगवर्तिनां राज्ञां वर्णनानि दृश्यन्ते। विष्णुपुराणे मौर्य वंशस्य प्रामणिकं विवरणं लभ्यते। मत्स्यपुराणे आन्ध्रनृपतयः[2] स्मृताः। वायु पुराणे गुप्तनृपतयो वर्णिताः।[3]
4. महाभारत कृता पुराणानि स्मृतानि पद्म पुराणे ऋषयश्रृंगस्य यद् वृत्तं वर्णयत तन्महाभारतेऽपि प्राप्यते।[4]
5. कौटिल्यकृतमर्थ शास्त्रं पुराणानि निर्दिष्ट तत्र हि विनेयेभ्यो राजपुत्रेभ्यः पुराणानि उपदेष्टव्यानीति निदृिष्टम्। अर्थशास्त्रं चन्द्रगुप्त राज्य कालिक मिति ततः पूर्व पुराण रचनां सिद्धयति।[5]

धर्मसूत्रेषु पुराणानि स्मर्यन्ते। -- तदिमानि सवाणि तत्वा पुराणानां वैदिककालेऽप्यस्तित्वं समर्थयन्ते ईसवीयशतकात षट

---

1. छान्दोग्य. - 2/22/35
2. मत्स्य.
3. वायुपुराण
4. छान्दोग्य
5. छान्दोगय

शतकपूर्वतनकाले पुराण भासितत्वमासीददति कल्पनाऽपि सत्यानुमोदिति इदं तु सत्यं यत् पुराणस्यादिमं रूपं सम्प्रनावाज्यते। पुराणं कदाचिदेकत्र समये नास्य समये समये तत्राध्याया योजिताः गुप्त पर्यन्तं तेषां वर्तमानरूपमुपन्नमासीत्।[1]

**पुराणानामनामानि तत्प्रमाणं च :----**

पुराणानां संख्या विषये मतभेदो नास्ति सर्वाविदिसिद्धं तेषाभष्टादशत्वम् --

मद्वयं मद्वयं चैव ब्रत्रयं व चतुष्टयम्।
अनापलिंगकूस्कानि पुराणानि प्रचक्षते।।
श्लोकोऽयं पुराणांना नामानि संगृहतानि।

**मद्वयम्** --मकरादि पुराण द्वयम् मत्स्य पुराण मार्कण्डेय पुराणश्च।
**भद्वयम्**--भकरादि पुराणं द्वयम्-भविष्य पुराणम् भागवत पुराणश्च।
**ब्रत्रयम्**-- ब्रादिपुरात्रयम् -ब्रह्माण्डपुराण् ब्राह्मपुराणम्, ब्राह्मवैवर्तश्च।
**चतुष्टयम्**--वकारादिपुराण चतुष्ट्यम्-वामन वराह-विष्णु-वायु पुराणानि।

---

1.छान्दोग्य.

| संकेताक्षरम् | पूर्णाक्षरम् |
|---|---|
| अ | अग्नि पुराण |
| ना | नारद पुराण |
| प | पद्म पुराण |
| लिं | लिंग पुराण |
| ग | गरुड़ पुराण |
| कूर्म | कूर्म पुराण |
| स्क. | स्कन्द पुराण |

**पुराणानां श्लोक संख्या :---**

1. तन्मत्स्य मिति जानीध्वं सहस्राणि चतुर्दश। 14000 श्लोकाः।
2. पुराणं नवमसहस्र मार्कण्डेयमिहाच्यते। 9000 श्लोकाः।
3. तद्रभागवत मुच्यते, अष्टादश सहस्राणि। 18000 श्लोकाः।
4. चतुर्विंशतिसहस्रणि तथा पंच शतानि च भविष्य चरितं प्रायः भविष्य तदिहरिच्यते। 24500 श्लोकाः।
5. ब्राह्म त्रिदश साहस्रं पुराणं परिकीर्तिते। 13000 श्लोकाः।
6. तदष्टादृश साहस्र पुराणं ब्रह्मववर्तमुच्यते। 18000 श्लोकाः।
7. तच्च द्वादश साहस्रं ब्राह्मण्डं द्विशताधिकं । 12200 श्लोकाः।

**8.** पुराणं दशसाहस्रं वामनं परिकीर्तितम्। 10000 श्लोकाः।

**9.** चतुर्विंशत्सहस्राणि तद वाराहमिहाच्यते। 24000 श्लोकाः।

**10.** आग्नेय तत्व षोडशसाहस्रं। 16000 श्लोकाः।

**11.** चतुर्विंशत्सहस्राणि वायजीयम्। 24000 श्लोकाः।

**12.** त्रयोविंशति साहस्रं वैष्णवं परिकीर्तियन्त। 23000 श्लोकाः।

**13.** पच्च विंशतिसहस्राणि नारदीयं तदुच्यते। 25000 श्लोकाः।

**14.** पाद्मं तु पच्च पच्चाशतसहस्राणि कथ्यते। 55000 श्लोकाः।

**15.** तदेकाश साहस्रे लैंगिं परिकीर्तितम्। 11000 श्लोकाः।

**16.** अष्टादश सहस्राणि गारुडं तदि होच्यते। 18000 श्लोकाः।

**17.** कूर्मकर्मी जनार्दनः अष्टादश सहस्राणि 18000 श्लोकाः।

**18.** स्कन्दं नाम पुराणञ्च हये काशीतिनिर्गद्यत सहस्राणि शतैश्चकम् 81100 श्लोकाः।

परं सख्येयं सम्प्रति प्राप्य माणेषु पुराणेषु बहुत्र भिद्यतेऽपि। एवं विध संख्याभेद प्रक्षेपलक्षप्रकभादापहारादिकानां मध्ये किमप्येकं स्यात्।

एतत्पुराणातिरिक्तानि अष्टादशोपपुराणान्यप्याख्यान्ते ---

1. सनत्कुमार
2. नारसिंह
3. स्कन्द
4. शिवधर्म
5. आश्चर्य
6. नारदीय
7. कपिलः
8. वामन
9. औशनस
10. ब्रह्माण्ड
11. वारुण
12. कलिका
13. माहेश्वर
14. साम्ब
15. सौर
16. पराशर
17. मारीचि
18. भार्गवेति नाम भेदोऽत्र बोध्यः।

देवी भागवते तु स्कन्द–वामन, ब्राह्मड–मारीचि–भार्गवेति प्रागयुक्तपुराणस्य कस्य स्थाने शिवमानस–आदित्य भगवत वशिष्ठेति नाम पच्चकमाख्यते। एतदर्थ सारेण श्रीमद् भगवतमुपपुराण कोटौ गणित भवतीति।

इत्थम्भूते सप्रमाण पुराणविवेचनम् अस्माभिः याथार्थ्य सैतिध्यं प्रतिपादितं पुराणां रचनाकालविषये सप्रमाणीयानि ग्रन्थमतान्यस्मभिः प्रतिपादितााान्यत्र। आहास्वित् पुराणानां रचयिता त्रयोदश शतकोत्पन्नो वोपदेवोऽपि वर्तते, मतमिदं अप्यातिष्ठते विवेचनादिष्वति, परन्तु इदं सर्वथा असम्मतं च प्रमाणविरहितं प्रति पुराणानां कर्ता भगवान् बादरायणः वेद व्यासः नान्य–इति निश्चप्रचम्। इदानीं वयं पुराणेषु भागवतस्य स्थानाञ्चाधिकं महत्वं विवेचयामः।

**पुराणेषु भागवतस्य माहातम्यमग्रत्वम् :---**

पुराणार्कोऽधुनोदितः।।[1]

श्रीमद्भागवतं शास्त्रं सूर्यवत् अकल्पनीयमद्वितीयं च भगवद्रूयमस्ति। पुराणेषु अर्कः तदेव श्रीमद्भागवतमहापुराणम्। अस्य शास्त्रस्य बहुविधं महत्वं सम्पूर्णोऽयं लोकः वेत्ति। सर्वशास्त्रसारं समुद्धदृत्य भगवान् व्यास इमां सात्वतसंहिता रचयामास। भागवतस्य सर्वेषु शास्त्रेष्वासमन्तात् महत्वं भजतेराम्।

---

1. श्रीमदभागवत्

स्वयं ब्रह्माऽपि अस्य शास्त्रस्यान्यैः शास्त्रैः सह तुलां बद्धवा तुलनां कृतवान्निति ---

“सत्यलोके तुलां बद्धवा, तोलयत्साधनानयजः।

लघूनि सर्वाणि जातानि, गौरवेण इदं महत्।।[1]

इयं वार्ता लोकप्रसिद्धा चापरयमपि कथा वर्तते यत् देवा अमृतम् नीत्वा कथामृतं पातुमानतुं समागतवन्तः। तदा विष्णुरातः (परीक्षितः) सर्वान् देवान् जहास उक्तवान् --

“ क्व काचः क्व मणिर्महान्।”

भो देवा अस्माकं कथामृतं महामणिः च भागवतामिदं कपटामृतं तु काचनतुल्य मतः गच्छन्तु। इदममृतं तु --

“ जन्मान्तरे भवेत्पुण्यं तदा भागवतं लभेत्।।”[2]

अथर्वेश्वर प्रसादाच्च वा-

यदा भाग्यं भवेद् भूरि

तदा भगवतं लभेत्।।[3]

---

1. श्रीमदभागवत्
2. श्रीमदभागवत्
3. श्रीमदभागवत्

एतादृशं भागवतमिदं वैष्णवं शास्त्रं वा शास्त्रेषु प्रथमत्वं भजते।

निमग्नानां यथा गङ्गा

उन्नतानां हिमालयः।

वैष्णवानां यथा शंभुः

पुराणेषु इदं तथा।।[1]

एतादृशं भागवतं सर्वप्रथमं स्थानं भजते स्वयं देवानाङ्कृतेऽपि भागवतस्वरूपम् मृत दुर्लभम्। इदमस्माकं महद्भाग्यमस्ति। यत् इदं ज्ञानं सत्यनिष्ठया सम्पन्नो भूत्वा जनः ग्रन्थमाध्यमेन वा सतां सङ्गेन प्राप्तु लब्धुं शक्नोति। वयं भागवत सात्वसंहिताया सोपानशः विविधैः दृष्टिकोणैः महत्वं पश्यामः।

**पुण्यविषयकमहत्वम् --**

श्रीमद्भागवतशास्त्रं पुण्यदमस्ति सर्वाश्येन तथाऽपि इदं शास्त्रं पुण्येन लभते।

जन्मान्तरे भवेद् पुण्यं

तदा भागवतं लभेत्।।[2]

इदं शास्त्रमतीव पुण्यं प्रयच्छति श्लाक पाठेनाऽपि पुण्यं प्राप्यतेश्वमेघ -राजसूयादि यज्ञानाम् इत्थं पुण्यविषयकं महत्वमपि प्राप्यते।

---

1. श्रीमद्भागावतम्
2. श्रीमद् भागवत माहात्म्य

**सामाजिकमहत्वम् --**

पूज्याः मोरारीबापूमहावर्य्याः स्वकथायां मुहुः कथ्यन्ति। यत् अद्य मानवः न परन्तु मानसं मलीनं जातम्। सर्वेषां मनांसि कलिप्रभावात् दूषितानि जातानि। भागवतः रामायणसदृशानां कथानामाधारेण एव जनः सुमनः भवितुं शक्नोति। शास्त्रसकाशात् श्रद्धा समर्पणदिगुणाः समाजे समायन्ति। अतो एतोः भागवतस्य समाजस्य सुनिर्माणाय अपि अकल्पनीयमहत्वमस्त्येव निश्चयम्।

**मोक्षविषयक महत्वम् --**

श्रीमद्भागवतं शास्त्रं मुक्तिदानन गर्जति। श्रीमद्भागवतं-मोक्षदायकं सर्वोन्नतं शास्त्रमस्ति इत्यत्र का शंका? धुन्धकारी पृभुतयः प्रेता अपि विमुक्ताः भुतवन्त इयं कथा लोकवादितस वर्तते। ''सप्ताह्यज्ञेन कला पुनन्ति ते'' इति प्रमाणमनुसृत्य जघन्यापराधिनोऽपि मुच्चन्तेऽस्य श्रवणेन। शास्त्रमिदमतः मोक्षदायकम्।

**आत्मिकोन्नतिविषयक महत्त्वम् --**

आत्मावाश्यमिदं सर्वमित्यादिकं सर्व श्रीमदभागवते वर्तते। मनुस्तवनेऽष्टमस्कन्ध जनस्य सर्वेषु विविधेषु विकासेसु तस्यात्मिको विकासोऽपि आवश्यको खलु।

जनस्य आत्मनान्नतिः इहलोकाय न परन्तु अपनलोक साधनायै शुभदा च मोक्षदा भवति। भागवतस्य भक्तानां

दिव्यचरितगायनेन तस्यान्मिको विकासोऽपि भवत्येव। अतः ग्रन्थोऽयं भवद्रूपः जनानां हिताय आत्महिताय चाऽप्यस्ति।

**श्रीमद्भागवतमहापुराणम् :--- (नामदर्शनम् महत्त्वञ्च )**

"अत्र यन्नाम् तत्र तद्गुणाः" नियमोऽयं रमाया शाश्वततत्वं स्वीकरोति। यथा "रमेशः" तदा रमाया ईशत्वधारणत्वात् रमेश इति। ईश्वर ईश–ऐश्वर्ये वरच् प्रत्यये सतीश्वर रूपम् इदं सिद्धयति। कथनाशयोऽयमव यत् नाम्नः सर्वे गुणाः नामानि भवति अंशस्य सर्वे गुणधर्माः तस्य अंशिनि प्रभवन्ति एव। यथा वेदग्रन्थेषु मन्त्राः सूत्रेषु मणयस्तर्थव नामानि नाम्नः विशेषस्य सर्वे गुणाः तस्मिन् श्रीमद्भागवतमहापुराणे सन्तति दिक्। वयं तु प्रतिशब्दस्य यथार्थ्येन गुणदर्शनं करिष्यामः लिखितमस्ति यत् --

श्रीमद्भागवतं पुराणतिलकं
यद्वैष्णवानां धनम्।
यस्यां पारमहंस्यमवममलं
ज्ञानं परं गीयते।।
यत्र ज्ञानविरागभक्तिसहितं
नैष्कर्म्यभाविष्कृतं।
तच्छृण्वन् प्रपठन् विचारणपरो
भक्त्या विमुच्येन्नरः।।[1]

---

1. श्रीमद्भागवत् मा.

**श्रीमद्भागवते--**

श्रिया युङ्गं यत् तत् श्रीमद्। श्रीशब्दः शोभार्थे मानार्थे सम्बोधनार्थे चैश्र्यार्थे। बहुष अर्थेषु प्रयुज्यते। ''श्रीमद्'' शब्दः भगवतः स्वायततसतां बाधयति। केवलं ग्रन्थद्वयेऽस्मिन्नेव शब्दोऽयं दृष्यते नान्यत्र --

1.श्रीमदभगद्गीता।

2.श्रीमद्भागवत महापुराणम्।

**भागवतम्** --

भगः अस्ति अस्य अस्मिन् वा यः सः ''भगवान''। भगवतः नामोच्चरणे पुण्यप्राप्तिः। अत्र भगः षडविधः।

ऐश्वर्यस्य समग्रहस्य
धर्मस्य यशसः श्रियः
ज्ञानवैराग्ययोश्चैव
षडेते भग इतीरणाः।।[2]

षडभगैर्युक्तः भगवान। भगवतः इदं यत् तद् भागवतम्।

---

1.श्रीमद्भागवत् मा.

2.शुकसुधायाम्

**महापुराणाम्** --

तत्र सर्गो विसर्गश्च इत्यादिभिः दशलक्षणेः युक्तं महापुराणम्-इत्युच्यते। पुराणं पञ्चविधं भवति च महापुराणं दशविधं भवति। पुरामनमपि नवमिति पुराणम्। महत् च तत् पुराणमिति महापुराणम्।।

**श्रीमदभागवतस्य रचनाकालः ---**

''विधावतां भागवते परीक्षा इत्युक्तेर्भागवतस्य काठिन्यं श्रुतिचरम्। अस्य भागवतस्य पुराणत्वे लोकाः सन्दिदृते ते हि देवीभागवत मेवाष्टदशपुराणान्तर्मतं मन्यन्ते न श्रीमदभागवतम्। त्रयोदशशत कोत्पन्नो वोपदेवानाम् चङ्गीयो विद्वान् श्री मदभागवतं प्रणीतवनिति कथनमपि श्री मद्भगवतस्य पुराणत्वं सन्देहे पातयतां केषाञ्चना वस्तुतत्व विदामेव।

वस्तुतस्तु पुराणेषु अपेक्षितस्य ग्रन्थविस्तरस्य सर्गश्च प्रतिसर्गश्च वंशो पञ्जलक्षणम् इति स्वरूप निर्देशस्य च भागवते सत्येन तदीयं महापुराणं न सन्देहो सत्वेन तदीयं महापुराणत्वं न सन्देहो । श्रीमद्भागवत गायत्री मन्त्रै मन्त्रणारभ्यते तेनैव च समाप्तिमाप्नोति मन्त्रैः महामन्त्रसम्पुटितः मिदं न केवलं पुराणमेवापि तु महापुराणम्। अष्टादश पुराणेषु मण्डनापि भागवत शब्दसाधा-रण्यादुर्भयोः शीलतया प्राथम्यमर्हति।

वोपदेवेन त्रयोदशशतको त्पनेन भागवतं रचितमिति कथनं तु नितान्त निमूर्लम् तत्र कारणान्यद्यो निर्दिश्यते।

द्वैतमतानुयायी मध्वाचार्यी भागवतोपरि भागवतता टीकाग्रन्थं व्यरचयत् मध्वाचार्य 1199 ई. वर्षो जन्मग्रहीत् अंतरप्रयो दशशतकात् पूर्वकालिकं भागवतं त्रयोदश ताद्यामुत्पन्नेन वोपदेवेन प्रणीतं न सम्भवति।

2.एकादशश्तोत्पन्नो रामानुजाचार्यो वेदान्तातत्व सारनामक स्वग्रन्थे भागवतं वतिवेदं स्तुते: पद्यमुद्रघृतवान्।

3.चित्सुखाचार्यण नवमशत कस्मभूतेन विरचिताया भागवत व्याख्या निर्देशो मध्वाचार्य श्री हारस्वामिना जयध्वजै: स्वग्रनथेषु कृत:।

4.दशमशतकोत्पन्न: प्रत्यमिभ्सा दर्शनचार्योऽभिनवगुप्त: स्वीयायां गीताटीकायां भागवत स्यैकादश स्कन्धत: कतिपय पद्यानि उद्धृतवान्।

5.सांख्यकारिकासु स्वावृत्तिनामनी व्याख्या विद्यत यस्या: अनुवाद: चीनदेश भाषाया 557-569 मध्ये कदाचितजायते, तदा भगवतस्य श्लोकद्वयं निर्दिष्टम्।

6.अष्टमशतकमोत्पन्न: शंकराचार्य: गोविन्दाष्टकप्रबाध सुधाकरनामकया: खस्तोप्रयो: स्तृतिप्रसंगे यासां घटनानां चर्चामकृता ता भगवत इव स्थ्ता:।

7.शङ्कराचार्यस्य परमगुरव: गौड़पदाचार्या: पज्जीकरण व्याख्यां जगृहे पौरुषं रूपम् इति भागवतस्य पद्यं भागवताना

मापेदानं पूर्वकमुद्‌धृतवान। अयं गौडपदाचार्यः षष्टशतकरत्‌ परतो नैव सम्भावयितुं शक्यत।

इमानि प्रमाणकानि समेरीनादं साध्यन्ति भागवतस्य षष्ठशतकात्प्राचीन ताम्‌ तथा सति त्रयोदश शताब्दीजातेन वोपदेवने निर्मितत्वं वक्तुमरूपसहायैव केवलम्‌। पद्मपुराणान्तर्गतभागवत माहातम्यानुसारेण तु कलियुगप्रारम्भ एवं भागवतस्य निर्माणं सिद्धयतिं

वोपदेवेन यदि भागवतं कृतं तदा हरिलीलामृतं मुक्ताफलं चेति ग्रन्थद्वयं कथं कृतम्‌। हरिलीलामृते भागवतानुक्रमणी विद्यते मुक्ताफलं च भागवतस्य श्लोकानां संग्रहः वोपदवस्य भागवतस्य रचयित्वे मुक्ताफलं सदृश्यस्य तेनैव प्रणयनं च्यर्थमव स्यात्‌।

**भागवतस्य चम्पूधर्मत्वम्‌ :---**

भागवतस्य चेत्‌ साहित्यदृष्टया समीक्षणं भवत्तदा तस्य काव्यप्रकारः कः? भागवतं गद्यमयं च पद्यमयमपि। गद्यपद्य धर्मद्वयंधारणत्वात्‌ इदं काव्यं चम्पूकाव्यम्‌ इति कथयितुं शक्यते विश्वनाथमतेन।

गद्यपद्यमयं काव्यं, चम्पूरित्यभिधीयते। साहित्यदर्पण इति प्रमाणत्‌ इदं भागवत महापुराणं गद्यपद्ययुकतमस्ति, तस्माद्धेतोस्य काव्यप्रकारः ‘चम्पूरित्येव भवितुमर्हति। भागवते मनोहराणि गद्यानि अपि सन्ति।

वादमुक्तं भगवत उत्तमश्लोकस्य श्रीमच्चारणारविन्द मकरन्दरस आवेशितचेतसो भागवतपरमहंसदयित कथां किञ्चिचदन्तराय विहतां स्वां शिवतमां पदवीं न प्रायेण हिन्वन्ति।[1]

तथा चापरं विदुषामिदमपि वर्तते। यत् अस्मिन् भागवते गद्यानि न सन्ति। ययानि गद्यानि तानि सर्वाणि वैदिक छन्दसा परिवद्धा सन्ति, अत: तानि न गद्यानि आहास्वित् पद्यानि एव सन्ति। परन्तु इदं मतबद्धं न परीक्षते।

**भागवतस्य कविता सौष्ठवम् :---**

भागवतस्य पद्येषु गद्येष्वपि चमत्कारं सौष्ठवं प्राप्यते यत् तन विदुषां मनसि दृढासृज्यन्ते नवेषु काव्येषु जातेष्वपि भागवता काव्य माधुरी नापकृष्टता गता। तत्पाठक मनांसि भागवतं काव्यमेव प्रथमं मन्यन्ते ततोऽनन्तरं पुराणदि किञ्चिदन्यत्। भागवते समायातानि मथुराद्वारका प्रभुतय: नगरीवर्णनानि यथा कलायुक्तानि तथैव यथार्थन्यापि। केशिनो विकारालस्य रूपस्य जरासन्ध भीमयो भीषणस्य महायुद्धस्य च वर्णनमस्ति। यत् रोमाच्चमुदुच्चयति तदा। गोपीगीत भ्रमरगीतादि पठ्यमानमेवा हृदयं सितमितव्यानि नयने उदप्रश्यति च।

---

1. श्रीमदभागवतम् -- 5/1/5

रत्नप्रदीपनिकर धुतिभिनिरस्त–
हवान्तं विचित्रवलभीषु शिखाण्डिनोङ्गग।
नृत्यन्ति यत्र विहितागुरुधूम्रपक्षै
निर्यान्तमीक्ष्य धनबुद्धयं उत्रन्तं।।[1]

द्वारकाधीश वर्णन पद्येऽस्मिन् मयूराणां भ्रमस्य वर्णनम् नीतान्त मनोहरमदिं। भागवतस्थितेषु वर्णनेषु चमत्कारस्त दाडतिराय माप्नोति यदा तत्र वर्णनेष्वपि आत्माहिताघाटका आध्यात्मिका उपदेशा रसवृष्टि कुर्वते।

''गिरयो वर्षधारशोमिर्हन्यमानां न विव्युथः।
अभिभूयमाना विषयैय पाड द्योक्षजचेतसः।।
सरिद्भिः संमतः सिन्धु चुश्रुभे श्वसनोभिवान्।
अपजीव्ययोम्निश्चितं कामाक्तं मूलयुग्मया।।[2]

रासपञ्चाध्यायी भागवतस्य काव्यकलायाः पराकाष्ठया निदर्शनम् शरदुदाशये साधुजातसत्स रसिजोदरश्रीमुषा दृशासुरतनाथ तेऽशुल्कदासिका वरद विघ्नता नेटिकिंवंद्य। चरसि यद् प्रजीज्जनारायन् पशून् नलिनसुन्दरं मनः पदम्।। तृणकुशांकुरः खिद्यतीति न कलिकतां मनः कालं गच्छति। ईदृशं संगीतमयं ह्रदयोद्मा प्रकाशनक्षत्रं च सरस काव्य वस्तुतः संस्कृत साहित्येऽपि दुर्लभामिति कथनं भूतार्थ कथनमेव।

---

1. श्रीमदभाग. 2.श्रीमदभाग.

**भागवतस्य टीकासम्पत् :---**

वैष्णव दार्शनिकैः सर्वैरेव भागवतस्य व्याख्या कृता तद्वं भागवतग्रन्थो ब्रह्मसूत्रसमतां मतः। अस्य ग्रन्थस्य टीकासमयः देवासीयं गौरवं गमयितुमलम् --

1. चित्सुखातवार्यकृतां टीका नोपलभ्यते केवलं निर्दिश्यते।
2. श्रीधरकृता टीका द्वयं प्रमाणिकी श्रीधरः सकल वेत्तिं श्री नृसिंह प्रसादतः इति श्रुतेः।
3. सुदर्शनसूरिणः शुकाक्षीया टीका श्री वैष्णवतपोषिका।
4. वीररादवात्याचार्यस्य भागवचन्द्र चन्द्रिका टीका श्री वैष्णवतपोषिका।
5. विजयध्वजाकृता पदरतवली माध्वमतपोषिका।
6. सनातनमास्वामिनः बुद्धद्वज्जवतोषिकी दशमसकन्धस्य।
7. जीवगोस्वामिनः क्रमसन्दीर्ाः।
8. विश्वनाथ चक्रवात्तिनः सारदर्शनी।
9. जीवगोस्वामिनः षटसन्दर्भः तत्वविवेचन ग्रन्थः।
10. वल्लभचार्यस्य सुबोधिनी वल्लभ सम्प्रदायस्य।
11. शुकदेवा चार्यस्य सिद्धान्तप्रदीय निमबार्क सम्प्रदायस्य।
12. श्री हरेः हरिभक्ति रसायनं नाम पद्यमयी टीका।

एवं वयं पश्यामो यदाचार्याः भागवत स्वमतपोणाय सादरं व्याचस्यु अतोऽस्य ग्रन्थस्य सारतत्वं प्रस्तुतां अस्ति।

निगमकल्पितशोमलितं फलं शुकमुखा, दमृतद्रवस स्मितम्।

पिबत भागवतं रसमालयं मुहुरहो, रसिका भुवि भावुका।।

**ज्योतिषशास्त्रवर्णनम ( गणितजातकभागयोः विवेचनम्)**

**गणितविषयकं वर्णनम्**

सन्दन उवाच -

ज्योतिषाङ्गं प्रवक्षामि यदुक्तं ब्रह्मणा पुरा।

यस्य विज्ञानमात्रण धर्मसिद्धिर्भवेन्नृणाम्।।

त्रिस्कन्धं जयोतिषं शास्त्रं चतुर्लक्षमुदाहृतम्।

गणितं जातकं विप्र संहितास्कन्धसञ्चितम्।।

अर्थात ज्योतिषं त्रिस्कन्धातमकं शास्त्रं विद्यत यथा हि --

1.गणितम् ( सिद्धान्तशास्त्रम्)

2.जातकम् ( होराशास्त्रम् )

3.संहिता

**गणितस्य विवेच्यविषयाः** --

गणित परिक्रर्मणि खगमध्यस्फुटक्रिये।

अनुयोगश्चन्द्र सूयग्रहणं चोदयस्तकम्।

छाया श्रृंङ्गोन्नतियुती पातसाधनमीरितम्।। एते विषयास्सन्ति।

**जातकस्य विवेच्यबिन्दवः ---**

राशिभेदाः ग्रहयोनिः

वियोनिजः गर्भाधानम्, जन्मः, अरिष्टः,

आयर्दायः दशाक्रमः, ---

कर्माजीव:(आजीविका) अष्टवर्ग:, राजयोग:,

नाभसयोग:, चन्द्रयोग:,

प्रव्रज्यायोग:, राशि:,

ग्रहदृष्टिफलम्, भावफलम्,

आश्रययोग:, प्रकीर्णविषया:,

अनिष्टयोग:,

स्त्रीजातक जन्मकालज्ञानप्रकारा:,

द्रेष्काणस्वरूपम् एते विषया: जातके विवेच्यमाना: भवन्ति। अत्र गणित-जातकयो: बहुविषयनां नामदर्शनं कुर्वन् वयमग्रे संहिताशास्त्रस्य विषयान् विवेच्यमस्तथा त्रयाणां गूढज्ञानविषयमपि करिष्याम:।

**संहितास्कन्धे** ---

ग्रहगतिवर्णनम् वर्षलक्षलणम्

तिथि:, दिवस:

नक्षत्रविवचनम्, योगा:,

करणानि, मुहूर्तानि,

उपग्रहा: सूर्य संक्रन्ति:

ग्रहगोचरतवम्, चन्द्रमा

ताराबलम् सर्वलग्नानि

षोडश संस्कारा: तत्कालिकंवृष्टिज्ञानम्,

कर्मवैलक्षण्यम् उत्पत्तिलक्षणानि इति।

अत्र ज्यातिषे गणितं प्रारभ्यते।

**सङ्ख्या --**

| | |
|---|---|
| एकम् -- | 1 |
| दश -- | 10 |
| शतम् -- | 100 |
| सहस्र -- | 1000 |
| अयुतम् -- | 10000 |
| लक्षम् -- | 100000 |
| प्रयुतम् -- | 1000000 |
| कोटि -- | 10000000 |
| अर्बुदम्-- | 100000000 |
| अब्जम्-- | 1000000000 |
| खर्वकम् - | 100000000000 |
| निखर्वम् - | 1000000000000 |
| महापद्म्- | 10000000000000 |
| शङ्कुः -- | 100000000000000 |
| जलधिः - | 1000000000000000 |
| अन्त्यम् - | 10000000000000000 |
| मध्यम् -- | 100000000000000000 |
| पराद्धर्म- | 1000000000000000000 |

इयं संख्या ज्योतिष–परिगणनायां–ग्रहणाम् अवस्थाज्ञानार्थमतीव महत्वपूर्णाः सन्ति। अग्रिमेषु प्रकरणेषु गणितप्रकराणानां विवेचनं भविष्यति।

**ग्रहाणां परगणनं भगणानाम्**

एकसिमन् युगे पूर्वदिशायां चलन् --

सूर्यबुधशुक्रणां -- 8320000 – भगणाः।

मङ्गलशनिगुरुणां --8320000 – भगणा एव।

चन्द्रमसः -- 57753336 – भगणाः।

भौमस्य -- 2296832 – भगणाः।

बुधस्य -- 17937060 – भगणाः।

शुक्रस्य -- 7022376 – भगणाः।

शनैश्चरस्य -- 146568 – भगणाः।

**अथ प्रवर्तितयुगस्य अहर्गणज्ञानम् :---**

**उदाहरण (हिन्दी में)**

शाके – १८७५ कार्तिक शुक्ल पूर्णिमा–शुक्रवार को अहर्गण यदि बनाना हो तो कलियुगादिसे गत युधिष्ठिर संवत्सर की वर्षसंख्या 3171 में शाके १८७५ जोड़ने से 5054 हुआ। इसी को 12 से गुणा करने से 60648 हुआ। इसमें चैत्र शुक्ल प्रतिपदा से गत मास सख्या में ७ जोड़ने पर 15९3336 से गुणा करने पर ९8७५५८५ हुआ।

१८७५५८७ में घटाने से 1846268 अहर्गण हुए।

गणित प्रकरणे ग्रहाणां देशान्तर–संस्कार, रेखादेश, वार, प्रवृत्ति, इष्टकालग्रहणज्ञानादीनां वृहदवर्णनं विद्यते।

नारदीये ज्योतिषशास्त्रस्य सर्वाधिकमासमन्तात् वर्णनं च सूक्ष्मातिसूक्ष्मगणितक्रियाः गणिताः पिरिणिताश्च वर्णितास्सन्ति। अग्रे वयं पञ्चाङ्गणितविषयकं ज्ञानं लभामहे।

गणितविषयकं ज्ञानं नातिविस्तरेण वर्णयित्वा वयं जातकशास्त्रविषयकं ज्ञानं प्राप्स्यामः।

**जातकप्रकरणम् :---**

अस्मिन् प्रकरणे ग्रहाणां शील–गुणादिनिरूपम्।

ग्रहाणां दृष्टिज्ञानम

ग्रहाणां कालमानम्

ग्रहाणां मैत्रीकरणम्

ग्रहविषयकीचर्चा वर्तते।

| ग्रहा: | सूर्य: | चन्द्र: | भौम: | बुध: | गुरु: | शुक्र: | शनि: |
|---|---|---|---|---|---|---|---|
| जाति: | क्षत्रिय: | वैश्य: | क्षत्रिय: | शूद्र: | ब्राह्मण: | ब्राह्मण: | अन्त्यज: |
| शीलम् | तीक्ष्ण: | मृदु: | क्रूर: | मिश्र: | सौम्य: | सौम्य: | क्रूर: |
| लिङ्गगं | पुरुष: | स्त्री | पुरुष: | नपुंसक: | पुरुष: | स्त्री | क्लीब: |
| दिशा | पूर्व: | वायव्य: | दक्षिण: | उत्तर: | ऐशान्यं | आग्नेयं | पश्चिम् |
| गृहम् | सिंह | कर्क: | मेष<br>वृश्चिक | मिथुन<br>कर्क | धनु<br>मीन | वृश्चिक<br>तुला | मकर–<br>कुंभ |
| गुणा | सत्व: | सत्व: | तम: | रज: | सत्व: | रज: | तम: |
| स्थानम् | देवालय | जलाशय: | अग्निशाला | क्रीडास्थानं | भूमि: | भण्डार: | शयनालयं |
| आत्मदि | आत्मा | मन: | बलम् | वाणी | ज्ञानसुखे | कन्दर्प: | दु:खम् |
| छेवता | अग्नि: | जलम् | कार्तिकेय: | विष्णु | इन्द्र: | इन्द्राणी | ब्राह्मा |
| द्रव्यम् | ताम्र: | मणि: | सुवर्णम् | काँस: | रजत् | मोतिकं | लौह |
| धातु: | अस्थि: | शोणितम् | मज्जा | त्वचा | वसा | वीर्य: | स्नायु |
| अधिकार | राजा | श्राजा | सेनापति | युवराज: | प्रधानमंत्री | मन्त्री | भृत्य: |

सूर्यादिग्रहाणां जातिशीलादिवर्णनम्।

**वारप्रकरणम्**

| | |
|---|---|
| रविः, | स्थिरः |
| सोमः | चरः |
| मंगलः | क्रूरः |
| बुधः | समपूर्णः |
| गुरुः | लघुः |
| शुक्रः | मृदुः |
| शनिः | तीक्ष्णो भवति। इदं ग्रहधर्मज्ञानम्। |

**निन्द्य-मुहूर्तानि** -

रविवासरस्य प्रारम्भे रवौ 7,5,4, सोमेऽस्मिन् 6,4,7, भौमे सति 5,3,2, बुधे 4,2,5, गुरौ 3,2,8, शुक्रे 2,7,3 च शनौ 1,6,8 एते प्रहरार्धाः क्रमशः कुलिक उपकुलिकं च वारवेला-इत्याख्यन्ते। अस्य मानं प्रहरार्धं वेदतिव्यम्। नक्षत्राधिपतिकथनम् -

अत्र क्रमशः सप्तविंशति नक्षत्राणां स्वामिनामानि प्रस्तूयन्ते।

| | |
|---|---|
| 1.अश्विनीकुमारौ | 2. यमः |
| 3.अग्निः | 4. ब्रह्मा |
| 5.चन्द्रः | 6. शिवः |
| 7.अदितिः | 8. गुरुः |
| 9.सर्पः | 10. पितरः |

| | |
|---|---|
| 11.भगः | 12. अर्यमा |
| 13.सूर्यः | 14. विश्वकर्मा |
| 15.वायुः | 16. इन्द्राग्नी |
| 17.मित्रः | 18 इन्द्रः |
| 19.निर्गतिः | 20. बलदेव |
| 21.विश्वदेवाः | 22. ब्रह्मा |
| 23.विष्णुः | 24. वसुः |
| 25.वरुणः | 26. अजैकपादः |
| 27.अहिर्बुध्न्यः | 28. पूषा |

एते क्रमशः प्रारभ्य अश्विनीतः नक्षत्राधिपतयः सन्ति। जातकस्य कृते स्व नक्षत्रेशपूजनं शुभकरं भवति। इति दिक्

अत्र पौराणिके ज्योतिषविवेचने नक्षत्राणां ध्रुवादिसंज्ञा नक्षत्रानुसारेण कार्यनिर्देशः, वृहत्समाधमनक्षत्राणि, पुण्यप्रशंसा तारासंख्या इत्यादिकं नक्षत्रविवेचनं विवचितम्।

**योगस्वामिनः**

| | |
|---|---|
| 1. यमः | 2. विश्वदेवाः |
| 3. चन्द्रः | 4. ब्रह्मा |
| 5. गुरू | 6. चन्द्रः |
| 7. इन्द्रः | 8. जलम् |
| 9. सर्पः | 10. अग्निः |
| 11. सूर्यः | 12. भूमिः |

13. रुद्रः 14. ब्रह्मा

15. वरुणः 16. गणेश

17. रुद्रः 18. कुबेरः

19. विश्वकर्मा 20. मित्रः

21. षडानन 22. सावित्री

23. कमला 24. गौरी

25. अश्विनीकुमारौ 26. पितरौ

27. अदितिः।

एते सर्वे देवाः विष्कम्भप्रभीतीनां योगानां स्वामिन प्रोक्तरस्सन्ति। योगमाध्यमेन जायमानाः निन्द्ययोगाः खार्जूरचक्रम् इत्यादिकं महता चात्र वर्णितम्। इदानीं किञ्चित करणज्ञानम्।

| **करणस्वामिनः –** | **शुभाशुभविभागः** |
|---|---|
| बवः | इन्द्रः |
| तैतिलः | ब्रह्मा |
| गरः | मित्रः |
| वणिजः | भूमिः |
| विष्टिः | हरितप्रियाः |
| शकुनिः | कीनाशः |
| चतुष्पदः | कलिः |
| नागः | रुद्रः |
| किंस्तुघ्न | सर्पः–मरुतः |

इमानि करणानि सन्ति। बव तः प्रारभ्य षट् करणानि शुभं भवति। विष्टि करणं सर्वथा निन्द्यम्।

**वर्गज्ञानम्** ---

समाङ्कघातो वर्गः स्यात्, तमेवाहः कृतिं बुधाः।

यथा हि वर्गमूलस्योदाहरणम् --

16384 इत्यस्याः सङ्ख्यायाः वर्गमूलं 128 भवति।

**घनमूलज्ञानम्** --

उदाहरणम् समत्र्यङ्कहतिः प्रोक्तो, घनस्तत्र विधिः पदे।

29683 प्राच्यते विषमं त्वाघं, समे द्वै च ततः परम्।

विशोध्यं विषमादन्त्याद्, घनं तन्मूलमुच्यते।।

त्रिनिध्यन्याप्तं मूलकृत्वा, समं मूले न्यसेत् फलम्।

तत्कृतिञ्चान्यनिहतात्, त्रिघ्नीं चापि विशाधयत्।।

12)126(27 घनमूलम् घनं च विषमादेवं, घनमूलं मुहुर्भवेत्।।

84

-------

328

294 7x7x2x3

------

343

343 7x7x7

--------

0 0 0

**इष्टराशिः**

उदृष्टराशिः संक्षुण्णो हृतोऽशै रहितो युतः।

इष्टघ्नदृष्टमेतेन भुक्तं राशिरितीरितम्।।

यथा --जैसे किसी ने पूँछा कि वे दोनो कौन सी संख्याएँ हैं। जिनका योग 101 और अन्तर 25 है। यहाँ योग को जगह लिखा-

| | |
|---|---|
| 101 | 101 |
| -25 | +25 |
| ------- | ------------ |

संख्ये 38 एवं63 वर्तते।

| | |
|---|---|
| 76 | 126 |

76 ÷2 =38, 126÷2=63

**अथ युगमानम्**

युगमानम् स्मृतं विप्र खचतुष्करदार्णवाः।

तदृशांशास्तु चत्वारः कृतख्यं पदमुच्यते।।

त्रयस्त्रेता द्वापरो द्वौ कलिरेकः प्रकीर्तितः।

मनुः कृताब्दसहता युगानामकेसप्ततिः।।

विधेर्दिने स्युर्विपेन्द्र मनवस्तु चतुर्दश।

तावत्येव निशा तस्य विपेन्द्र प्रकीर्तिता।।

अत्राधिकं सरलत्वं पूर्वकं युगमानं प्रस्तूयते---

सत्ययुगः 1728000 वर्षाणि

त्रेतायुगः 1296000 वर्षाणि

द्वापरयुगः 864000 वर्षाणि

कलियुगः 832000 वर्षाणि

**वार–ज्ञानम् --**

रविवासरस्य अर्यमा, सोमवासरस्य–ब्रह्म–राक्षसौ, भौमस्य पितरश्च अग्निः, बुधवारस्य अभिजित, गुरुवारस्य राक्षसः च जलम्।

**ग्रहाणां स्वरूपञ्च स्तवनम् :---**

ग्रहाणां स्वरूपं कीदृशम्? तेषां स्वभावः की दृशः? गुणादीनां समपूर्ण विवेचनमत्र भागवतपुराणम् आधारीकृत्य विज्ञापयामो वयम् अत्र। ग्रहाणां विषये भाषते यत् --

ग्रहाः राज्यं प्रयच्छन्ति ग्रहाः राज्यं हरन्ति च।<br>
ग्रहैश्च व्यापितं सर्वं त्रैलोक्यं सचराचरम्।।

इत्थभूताः ग्रहाः विशेषण लगनेशः पूजनेन तुष्टः सति सकलैश्चर्यं प्रयच्छति स्तवनकतृकेभ्यः भक्तेभ्यः वयमत्र पाराणिकं व्यासकृतं स्तवनं प्रस्तौमः।।

**ग्रहस्थित्या वृष्टिविचारः ----**

यदा सूर्यः भगवान् गगनचूड़ामणिः आद्रानक्षत्रं प्रविशति तदा वृष्टिः भवति। तस्मिन् काले चेत् शुक्लपक्षो भवेत, चन्द्रः जलचरराशौ वा लग्नतः केन्द्रस्थानेषु शुभग्रहदृष्टः भवति, तदा ‘‘अधिकवर्षायोगौ’’ जायते। चन्द्रश्चेत् पापग्रहण दृष्टः भवति तदा ‘‘अल्पवर्षायागः’’ सज्जायते। यत् फलस्माभिः पुराणप्रमाणिंत

चन्द्रेण दर्शितं तदेव फलं शुक्रेणाऽपि बोधव्यम् इति वा चन्द्रशुक्रयोः सहाभ्यासमाध्यमेन विवेकलोचनपथा फलादेशो वृष्टिविषयको विशिष्यते।

**वर्षाबोधकानि चिह्नानि**

1. चन्द्रमण्डले परिवेषः
2. उत्तरदिशि विद्युत्तडित्प्रकाशः
3. मण्डूकानां ध्वनिः
4. पश्चिमतः मेघस्य दक्षिण दिशां गमनम्
5. मार्जारस्य धरित्रीखननम्
6. बालकानां मृतिकासेतुबन्धनम्
7. लोहतामाद्रिषु मलाच्छादनम्
8. आकाशान्तराले प्रकाशितजन्तुदर्शनम्
9. सूर्याणां वृक्षराहणम्
10. महावेगेनवायुवाहनम्

इमानि सर्वाणि चिह्नानि लक्षणानिवा ऋषिभिः अतिवृष्टिकरणशीलानि कथितानि सन्ति।

**हिक्काफलम् (छींक का फल)** :---

यात्रायां सर्वहिक्काः निन्दनीयाः सन्ति। गावः हिक्का घातिनी भवति। बालवृद्धारोगी–कफशील–मनुष्यप्रभीतीनां हिक्का भवति।

**गृहप्रवेशज्ञानम् :---**

कृत्वा शुक्रं पृष्ठतो वामतोऽर्क
विप्रान पूज्यनग्रतः पूर्णकुम्भम्।
हर्म्यं रम्यं तोरणस्रग्वितानैः
स्रीभिः स्रग्वी गीतमाल्यैर्विशेत्तत्।।

गृहं सवप्रियं भवति। स्वयंभगवान् स्वभूमौ व्रजे स्निहाति। गृहनिर्माणान्तरं ''गृहप्रवेशः'' कदा वा कस्मिन् काले शुभफलदो भवतीति निर्णीयते चात्र।

**गृहप्रवेशविधिः ---**

समाप्तायां शालायां चन्द्रतारानुकूले पुण्येऽनुकूलहनि मातृपूजाभ्युदयिकं विधाय ब्राह्मणैः सह कृतस्वस्त्ययनो मंगलमूतर्यवेदघोषेण सजलपूर्णकलशगोब्राह्मण पुरस्सरः स्नातः शुक्लाम्बरधरः शुक्लमाल्यानुलेपनः तादृशपुत्रपौत्रादिसमेतस्तोरणाद्या-शालाद्वारेण प्रविशति--

ॐ धर्मसथूणा राज ॅश्रीस्तूयमहोरात्रे द्वारफलके इन्द्रस्य गृहावसमतो वरूथिनहं प्रपद्ये सह प्रजया पशुभिः सह यन्मे किच्चिदस्युपहतः सर्वगणः सखायः साधु संमतः तां त्वा शालेदिष्टपीठा गृहान्नः सन्ते सर्वतः। इत्यनेन मन्त्रेण --

ततः शालाधिपतिं प्रार्थयेत् दोषोपशमनाय--

प्रार्थयामीत्यहं देवं शालायामधिपस्तु यः।
प्रायश्चितप्रसंगेन गृहार्थेयन्मया कृतम्।।
मूलचच्छेदं तृणच्च्छेदं कृमीणां च निपातनम्।

हननं जलजीवानां भूमेः शस्त्रेण पातनम्।।
अनृतं भाषितं यच्च किं चिदर्थस्य पातनम्।
तत्सर्वं हि क्षमस्व त्वं यन्मया दुष्कृतं कृतम्।।
गृहार्थे यत्कृतं पापमज्ञानेनाथ चेतसा।
तत्सर्वं क्षम्यतां देवि शाले मम क्ष्मां कुरु।।

**गृहप्रवेशवेला --**

नूतनगृहे प्रथमप्रवेशः सर्वथोत्तरायणे कर्तव्यः शुभे कदन च शुभे मुर्हूते वास्तुपूजन-बलिदान-सम्पर्णपूर्वकं प्रवेशः क्रियेत्।

गृहप्रवेश विहितमासाः

माघः, फाल्गुनः, वैशाखश्च, ज्येष्ठः-मासचतुष्टयं गृहप्रवेशहतवे शुभकरं भवति। कार्तिकमासे मध्यफलम् भवति।

**विहितनक्षत्राणि --**

मृगशीर्ष, पुष्य-रेवती-शतभिषाचित्रानुराधात्र्युत्तरारोहिणी प्रभीतीनि नक्षत्राणि स्थिरसंज्ञकानि गृहप्रवेशार्थाम् अर्हाणि-उपयुक्तानि च भवन्ति। तेष्वपि गुरुशुक्रौ समुदितौ भवतस्तदा रात्रि विहाय रविभौमौ त्यक्त्वा रिक्ताथिच्च परिहार्य अन्यतिथिषु रात्रौ-दिने वा गृहप्रवेशोऽतिशुभः भवति।

**प्रवेशविधिः --**

गृहं चित्र-पुष्य पताकाभिः समलङ्कृत्य पुष्यतोरणादिभिः समलङ्कुत्य च वेद ध्वनिभिः शान्तिपाठपूर्वकच्च सौभाग्यवतीनां स्त्रीणां माङ्गलिकगीतायनपुरस्सरं वाद्यादीनां मङ्गलगायनपूर्वकं सूर्य

वामभागीकृत्य कलशाग्रो भूत्वा योगेकाले सूर्य वामभागीकृत्य कलशाग्रो भूत्वा योग काले गृहप्रवेशः सर्वदो भवति न संशयः।

**प्रवेशोपरान्त कृत्यः---**

ततो नृपो विप्रसुहृत्पेराधसः।
शिल्पज्ञभूगोलविदश्च लिङ्गिनः।
धनैश्च रत्नैः पशुभिः समर्च--
ये जज्डान्धदीनान् पुरवासिनश्च।।

**ज्योतिष जातकफलानुसारेण यात्रादिषु शकुनापाशकुनविचारः--**

**शकुनद्रव्याणि --**

ज्वालिताग्निः सुन्दराश्च, राजसिंहासनम्, सुन्दरी नारी, चन्दनादि सुगन्धद्रव्याणि, पुष्पाणि अक्षताः छत्रः, चामरः, शिविका, राजा, खाद्यसामग्री, ईखा, फलानि, मृतिका, अन्नम्, घृतम्, दधि, गोमयम्, धौतवस्त्राणि, शङ्खं, श्वेताश्चः ध्वजा, सौभाग्यवती नारी, ब्राह्मणः, आनकदुन्दुभयः, मृदंग, घण्टः, वीणादिशब्दाः वेदमन्त्राश्च मङ्गलगीतानि। इमानि सर्वाणि द्रव्याणि यात्रादिप्रारम्भे शुभानि च मंङ्गलानि प्रभवन्ति। सर्वकार्य सिद्धि प्रदानि भवन्ति।

**अपशकुन द्रव्याणि --**

पतितः नपुंसकः, जटाधारी मन्दः, औषधादिग्रहणं कृत्वा वमनकर्ता, तैलभ्यङ्गी, अस्थि, वसा, चर्म, अङ्गार, दीर्घरोगी, कार्पास, लवणम्, प्रश्नः यथा- कुत्र गच्छसि त्वम् इदानीम्?

इत्यादिकम्। तृणः शशः, वन्ध्या नारी, नत्रहीनः मुक्तकेशी, बुभुक्षः नग्नः।

एते सर्वे यात्राप्रारम्भे समुपस्थिता भवन्ति, तदावश्यमेव यात्रा अभीष्टा-सिद्धिप्रदा नैव जायन्ते।

**अपशकुन-परिहारः--**

यात्राकाले प्रथ्मावारमेवापशकुनं भवति तदा उत्तिष्ठः सन् स्वेष्टदेवस्मृतिः कर्तव्या। द्वितीयावारमपि अपशकुनं भवति तदा विप्रपूजनं कृत्वा गच्छेयुः। तदा तृतीयवारमपि चेदपशकुनावबाधनं भवति। तदा यात्रागमनं नैव क्रियेत्।

**लग्नकर्तव्यानि :----**

कस्यापि कार्यस्य प्रारम्भे तत्कालिकं लग्नमतीव महत्वपूर्णं बोधव्यञ्च भवति। सार्धहोरानिष्कालं ''लग्नम्'' इत्युच्यते। लग्नानि द्वादश यथाराशयः यथा हि --

मेषोऽथ मिथुनः, कर्कटः सिंहकन्यके।
तुलाऽथ वृश्चिको धन्वी, मकरःकुम्भमीनकौ।।[1]

राशयः त्वेय लग्नपदेनाभिधीयते। सूर्यादय समयात् प्रारभ्य द्विहोरात्मकः कालः ''लग्नम्'' इति भाषते। वयमत्र नारदपुरास्यालाकमाध्यमेन कानि-कानि कार्याणि कस्मिन्-कस्मिन् लग्न कर्तव्यानि? इति ज्ञापयामः स्वशक्त्यानुसारं पुराणाधारितञ्च।

------------------------

1. अमरकोश - 10/3/19

**मेषलग्नकार्याणि --**

पट्ट-बन्धनानि ( राजमुकुटधारणादिकम्) यात्रा, उग्रकर्माणि, सन्धिः, विग्रहः, आभरणधारणम्, धातु-आकारसम्बन्ध-कार्याणि, युद्धकर्म-इत्यादिकार्याणि मेषे कर्तव्यानि।

**वृषभलग्नकार्याणि --**

विवाहादिमङ्गलकार्याणि, गृहारंभादिस्थिरकर्म जलाशय निर्माणम्, गृहप्रवेशः कृषिः, वाणिज्यम्, पशुपालनादिकर्माणि सिद्धानि भवन्ति।

**मिथुनलग्नकार्याणि --**

कला, विज्ञानम, शिल्पकार्यम्, आभूषणनि, युद्ध-संश्रक, राजकार्याणि, विवाहः, राज्याभिषकादीनि कार्याणि।

**कर्कलग्नीयानि कार्याणि --**

वापी, कूप, तड़ाग, सरिता बन्धादीनां जलवरोधनानि कार्याणि प्रणालिकेनिर्माणम्, पौष्टिककर्म, चित्रकर्म, लेखनादि कार्याणि प्रशास्तानि भवन्ति।

**सिंहलग्नकार्याणि --**

ईख, धन्यगतकार्याणि, क्रय-विक्रयादिकार्याणि, हाटनिर्माणम्, कृषिकर्म, सवकर्म, स्थिरकार्याणि, साहस, युद्धाभूषणादीनि समपन्नानि भवन्ति कार्याणि।

**कन्यालग्नकार्याणि --**

विद्यारम्भः, शिल्पकर्म, औषधनिर्माणम् एवं सेवनम्, आभूषणनिर्माणम्, धारणच्च, समस्तानि चर-सिथर-कार्याणि, पौष्टिककर्म, विवाहादिसमस्तानि शुभानि कार्याणि कन्यालग्ने प्रभवन्ति।

**तुलालग्नकार्याणि --**

कृषिकर्म, व्यापारकर्म, यात्रा, पशूनां पालनम्, तुला सम्बन्धि कार्याणि, विवाह-उपनयनादीनि च कर्मणि सिद्धयन्ति।

**वृश्चिकलग्नकार्याणि --**

गृहारम्भादीनि सकलानि स्थिरकर्मणि, राजसेवा, राज्याभिषेकः, गोपनीयकर्मणि भवन्ति।

**धनुलग्नकर्मणि --**

उपनयन-विवाह संस्कारौ, यात्रा, अश्वकृत्यानि, गज-कृत्यानि-शिल्पकला, चर-स्थिर-मिश्रकार्याणि कर्तव्यानि भवन्ति।

**मकरलग्नकार्याणि --**

धनुः निर्माणम्, प्रत्यचचाबन्धनम्, शरसन्धानम्, अस्त्र-शास्त्रादिनिर्माणम्, कृषिः गौपपालनम्, अश्व, गजकृत्यानि, पशूनां विक्रयच्च-क्रयणम्। दासनियुक्तिः इत्यादीनि कर्मणिः।

**कुम्भलग्नकार्याणि** ---

कृषिः, वाणिज्यकर्म, पशुपालनम्, जलाशयविषयकानि कार्याणि, शिल्पकर्म, कलादिकम्, कलशशास्त्रशस्त्रादीनां निर्माणम् इतयादीनि कार्याणि भवन्ति।

**मीनलग्नकार्याणि** --

उपनयन–विवाह संस्कारौ, राज्याभिषेकः, जलाशय प्रतिष्ठानम्, गृहप्रवेशः भूषणनिर्माणम् जलपात्रनिर्माणम्, अश्वविषयकानि कृत्यानि अस्मिन् लग्ने करणेषु सत्सु शुभानि भवन्ति।

इत्थं लग्नफलं कार्यसाफल्यहेतवेऽपि अतीव महत्वपूर्णं वर्णितं च कथितं वर्तते भगवता व्यासेन।